# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

## अध्याय १०६

एतच्छ्रुत्वा शुभं वाक्यं पितामहसमीरितम् ।
अङ्केनादाय वैदेहीमुत्पपात विभावसुः ॥ १॥

तरुणादित्यसङ्काशां तप्तकाञ्चनभूषणाम् ।
रक्ताम्बरधरां बालां नीलकुञ्चितमूर्धजाम् ॥ २॥

अक्लिष्टमाल्याभरणां तथा रूपां मनस्विनीम् ।
ददौ रामाय वैदेहीमङ्के कृत्वा विभावसुः ॥ ३॥

अब्रवीच्च तदा रामं साक्षी लोकस्य पावकः ।
एषा ते राम वैदेही पापमस्या न विद्यते ॥ ४॥

नैव वाचा न मनसा नानुध्यानान्न चक्षुषा ।
सुवृत्ता वृत्तशौण्डीरा न त्वामतिचचार ह ॥ ५॥

रावणेनापनीतैषा वीर्योत्सिक्तेन रक्षसा ।
त्वया विरहिता दीना विवशा निर्जनाद्वनात् ॥ ६॥

रुद्धा चान्तःपुरे गुप्ता त्वच्चित्ता त्वत्परायणा ।
रक्षिता राक्षसी सङ्घैर्विकृतैर्घोरदर्शनैः ॥ ७॥

प्रलोभ्यमाना विविधं भर्त्स्यमाना च मैथिली ।
नाचिन्तयत तद्रक्षस्त्वद्गतेनान्तरात्मना ॥ ८॥

विशुद्धभावां निष्पापां प्रतिगृह्णीष्व राघव ।
न किं चिदभिधातव्यमहमाज्ञापयामि ते ॥ ९॥

एवमुक्तो महातेजा धृतिमान्दृढविक्रमः ।
अब्रवीत्त्रिदशश्रेष्ठं रामो धर्मभृतां वरः ॥ १०॥

अवश्यं त्रिषु लोकेषु सीता पावनमर्हति ।
दीर्घकालोषिता चेयं रावणान्तःपुरे शुभा ॥ ११॥

बालिशः खलु कामात्मा रामो दशरथात्मजः ।
इति वक्ष्यन्ति मां सन्तो जानकीमविशोध्य हि ॥ १२॥

अनन्यहृदयां भक्तां मच्चित्तपरिरक्षणीम् ।
अहमप्यवगच्छामि मैथिलीं जनकात्मजाम् ॥ १३॥

प्रत्ययार्थं तु लोकानां त्रयाणां सत्यसंश्रयः ।
उपेक्षे चापि वैदेहीं प्रविशन्तीं हुताशनम् ॥ १४॥

इमामपि विशालाक्षीं रक्षितां स्वेन तेजसा ।
रावणो नातिवर्तेत वेलामिव महोदधिः ॥ १५॥

न हि शक्तः स दुष्टात्मा मनसापि हि मैथिलीम् ।
प्रधर्षयितुमप्राप्तां दीप्तामग्निशिखाम् इव ॥ १६॥

नेयमर्हति चैश्वर्यं रावणान्तःपुरे शुभा ।
अनन्या हि मया सीतां भास्करेण प्रभा यथा ॥ १७॥

विशुद्धा त्रिषु लोकेषु मैथिली जनकात्मजा ।
न हि हातुमियं शक्या कीर्तिरात्मवता यथा ॥ १८॥

अवश्यं च मया कार्यं सर्वेषां वो वचो हितम् ।
स्निग्धानां लोकमान्यानामेवं च ब्रुवतां हितम् ॥ १९॥

इतीदमुक्त्वा वचनं महाबलैः
प्रशस्यमानः स्वकृतेन कर्मणा ।
समेत्य रामः प्रियया महाबलः
सुखं सुखार्होऽनुबभूव राघवः ॥ २०॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com